# श्री द्वादश ज्योतिर्लिंग स्तोत्रं

सौराष्ट्रदेशे विशदेऽतिरम्ये ज्योतिर्मयं चंद्रकलावतंसम् ।
भक्तिप्रदानाय कृपावतीर्थं तं सोमनाथं शरणं प्रपद्ये ॥ 1

श्रीशैलश्रृंगे विविधप्रसंगे शेषाद्रिश्रृंगेऽपि सदावसंतम् ।
तमर्जुनं मल्लिकापूर्व मेनं नमामि संसारसमुद्र सेतुम् ॥ 2

अवंतिकायां विहितावतारं मुक्तिप्रदानायच सज्जनानाम् ।
अकालमृत्यो: परिरक्षणार्थं वंदे महाकाल महासुरेशम् ॥ 3

कावेरिकानर्मदयो: पवित्रे समागमे सज्जनतारणाय ।
सदैव मांधातृपुरे वसंतं ओंकारमीशं शिवमेकमीडे ॥ 4

पूर्वोत्तरे प्रज्वलिकानिधाने सदा वसंतं गिरिजा समेतम् ।
सुरासुराराधित पादपद्मं श्री वैद्यनाथं तमहं नमामि ॥ 5

याम्येसदंगे नगरेऽतिरम्ये विभूशितांगं विविधैश्च भोगै: ।
सद्भक्ति मुक्तिप्रदमीशमेकं श्रीनागनाथं शरणं प्रपद्ये ॥ 6

महाद्रिपार्श्र्वेच तटेरमंतं संपूज्यमानं सततं मुनींद्रै ।
सुरासुरैर्यक्षमहोरगाद्यै: केदारमीशं शिवमेकमीडे ॥ 7

© 2022 Vedam Nadam

सह्याद्रिशीर्षे विमले वसंतं गोदावरितीर पवित्रदेशे ।
यद्दर्शनात्पातकमाशुनाशं प्रयाति तं त्र्यंबकमीशमीडे ॥ 8

श्रीताम्रापर्णी जलराशियोगे निबध्य सेतुं विशिखैरसंख्यै: ।
श्रीरामचंद्रेण समर्पितं तं रामेश्वराख्यं नियतं नमामि ॥ 9

यं डाकिनिशाकिनिका समाजे निषेव्यमाणं पिशिताशनैश्च ।
सदैव भीमादिपद प्रसिद्धं तं शंकरं भक्तहितं नमामि ॥ 10

सानंदमानंदवने वसंतमानंदकंदं हतपापबृंदम् ।
वाराणसीनाथमनाथनाथं श्रीविश्वनाथं शरणं प्रपद्ये ॥ 11

इलापुरे रम्यविशालकेऽस्मिन् समुल्लसंतं च जगद्वरेण्यम् ।
वंदे महोदारातर स्वभावं घृष्णेश्वराख्यं शरणं प्रपद्ये ॥ 12

ज्योतिर्मयद्वादशलिंगकानां शिवात्मनां प्रोक्तमिदं क्रमेण ।
स्तोत्रं पठित्वामनुजोऽतिभक्त्याफलं तदालोक्य निजं भजेश्च ॥ 13

॥ इति द्वादश ज्योतिर्लिंग स्तोत्रं संपूर्णम् ॥

© 2022 Vedam Nadam